STANDARD X QEPR

## ഗുണനിലവാരമുള്ള വിദ്യാഭ്യാസം
## കുട്ടികളുടെ അവകാശം

# ഒരുക്കം 2015

ഒരു തീവ്രപഠന പരിപാടി

# സംസ്കൃതം

**പൊതുവിദ്യാഭ്യാസ വകുപ്പ്, കേരളം**

# ഒരുക്കം പ്രവർത്തനങ്ങൾ – മാർഗ്ഗരേഖ

മുൻ വർഷങ്ങളിലേതു പോലെ കൂടുതൽ പരീക്ഷാസഹായിയായി പത്താം തരം വിദ്യാർത്ഥികൾക്ക് **ഒരുക്കം 2015** കൈകളിലെത്തുകയാണ്. ചിട്ടയായ പ്രവർത്തനങ്ങളിലൂടെ മുഴുവൻ കുട്ടികളെയും മികച്ച നിലവാരത്തിലെത്തിക്കുകയാണ് ഇതിന്റെ ലക്ഷ്യം. ഓരോ യൂണിറ്റും വിശകലനം ചെയ്യുകയും കുട്ടികളുടെ ഉത്തരങ്ങൾ അവലോകനം ചെയ്ത് അതിന്റെ അടിസ്ഥാനത്തിൽ വിവിധ വ്യവഹാരരൂപങ്ങളിലൂടെ കടന്നു പോകാനുള്ള അവസരമൊരുക്കുകയാണ് ഈ വർഷം ചെയ്തിരിക്കുന്നത്. പ്രവർത്തനങ്ങൾക്കിടയിൽ പഠിതാക്കൾ സ്വയം വിശകലനം നടത്തി താൻ കണ്ടെത്തിയ ഉത്തരങ്ങൾ വിശകലനം ചെയ്യുകയും വേണം. അധ്യാപകർ പ്രശ്നങ്ങൾ കുട്ടികളുമായി പങ്കുവയ്ക്കുകയും മറികടക്കാനാവശ്യമായ സഹായങ്ങൾ നൽകുകയും വേണം. ഇതിലെ പ്രവർത്തനങ്ങൾ സമയബന്ധിതമായി പൂർത്തിയാക്കേണ്ടതും കുട്ടികളുടെ മനസ്സിൽ ഉറപ്പിക്കേണ്ടതുമാണ്. ഇതിന്റെ വിജയത്തിന് അധ്യാപകർ, കുട്ടികൾ, രക്ഷകർത്താക്കൾ എന്നിവരുടെ സഹകരണവും കൂട്ടായ്മയും ഉണ്ടാകുമെന്നും അതിലൂടെ മികച്ച വിജയം കൈവരിക്കുമെന്നും പ്രതീക്ഷിച്ചുകൊണ്ട്.....

ജനുവരി 15 മുതൽ നടപ്പാക്കാനുള്ള പഠനപാക്കേജാണിത്. ഇവ എല്ലാ വിദ്യാലയത്തിലും നടന്നു എന്ന് പ്രഥമാദ്ധ്യാപകർ ഉറപ്പുവരുത്തണം. അതിനുള്ള നിർദേശങ്ങൾ ചുവടെ ചേർക്കുന്നു.

- ജനുവരി ആദ്യവാരത്തിൽ എസ്.ആർ.ജി. യോഗം ചേർന്ന് പരിപാടികൾ ആസൂത്രണം ചെയ്യണം.
- പി.ടി.എ., എം.പി.ടി.എ., ജനപ്രതിനിധികൾ - ഇവരുടെ യോഗം വിളിച്ച് പ്രവർത്തനങ്ങൾ വിശദമായി ആസൂത്രണം ചെയ്യണം.
- ജനുവരി 15 മുതൽ ഒരുക്കം ക്യാമ്പുകൾ നടക്കുന്നു എന്ന് ഉറപ്പുവരുത്തണം.
- കുട്ടികൾക്കാവശ്യമായ ഭക്ഷണം തയ്യാറാക്കി നൽകണം.
- ഓരോ അധ്യാപകനും ദത്തെടുത്ത കുട്ടികളുടെ പഠന പുരോഗതി നിരന്തരം വിലയിരുത്തി ചർച്ചകളിലൂടെ മെച്ചപ്പെടുത്തണം.
- 8,9 ക്ലാസ്സുകളിലും സമാന പഠനപ്രവർത്തനങ്ങൾ നടക്കുന്നുണ്ടെന്ന് ഉറപ്പാക്കണം.

ചിട്ടയായ പ്രവർത്തനങ്ങളിലൂടെ ഗുണമേന്മയുള്ള വിദ്യാഭ്യാസം കുട്ടികളുടെ അവകാശം എന്ന ലക്ഷ്യത്തിലെത്തിച്ചേരാൻ നമുക്ക് ഒത്തൊരുമിച്ച് പ്രവർത്തിക്കാം.

പി. കെ. അബ്ദുറബ്ബ്
വിദ്യാഭ്യാസ വകുപ്പുമന്ത്രി
കേരളം



തിരുവനന്തപുരം

തീയതി 08.01.2015

## മികവിലേക്ക് ഒരുങ്ങാം

എസ് എസ് എൽ സി വിദ്യാർത്ഥികൾക്കായി തയ്യാറാക്കിയ **'ഒരുക്കം'** എന്ന കൈപ്പുസ്തകം വിദ്യാർത്ഥികൾക്ക് മികച്ച വിജയം ഉറപ്പു വരുത്തുവാൻ ഉദ്ദേശിച്ചുള്ളതാണ്. **ഗുണമേന്മയുള്ള വിദ്യാഭ്യാസം കുട്ടികളുടെ അവകാശം** (Quality Education Pupil's Right) എന്ന പദ്ധതിയിലുൾപ്പെടുത്തിയാണ് ഇത് പ്രസിദ്ധീകരിക്കുന്നത്. എന്നാൽ ക്യു ഇ പി ആർ വിദ്യാലയങ്ങൾക്ക് പുറമെ മറ്റ് വിദ്യാലയങ്ങൾക്കും ഈ കൈപ്പുസ്തകം പ്രയോജനപ്രദമാകും എന്നതിൽ സംശയമില്ല.

ഗുണമേന്മയുള്ള തലമുറയെ സൃഷ്ടിക്കുന്നതിൽ ഗുണമേന്മയുള്ള വിദ്യാഭ്യാസം വഹിക്കുന്ന പങ്ക് വളരെ വലുതാണ്. മുൻ വർഷങ്ങളിൽ നടത്തിയ ചിട്ടയായ പ്രവർത്തനങ്ങൾ ക്യു ഇ പി ആർ വിദ്യാലയങ്ങൾക്ക് മികച്ച റിസൾട്ട് കൈവരിക്കുവാൻ സഹായകമായിട്ടുണ്ട്. നമ്മുടെ വിദ്യാഭ്യാസ മുന്നേറ്റത്തിന് കരുത്തും കരുതലും പകരാൻ നടത്തുന്ന ഈ യത്നത്തിൽ എല്ലാപേരും പങ്കുകൊള്ളണമെന്ന് ആഗ്രഹിക്കുന്നു. വിദ്യാലയങ്ങളെ മികവിന്റെ കേന്ദ്രങ്ങളാക്കി മാറ്റാനുള്ള ഈ യജ്ഞത്തിൽ ഭാഗമാകുന്ന എല്ലാപേർക്കും ആശംസകൾ അറിയിക്കുന്നു.

വിജയാശംസകളോടെ,

**പി. കെ. അബ്ദുറബ്ബ്**



Sy I

റൂം നമ്പർ 501, അഞ്ചാം നില, സെക്രട്ടേറിയറ്റ് അനക്സ്, തിരുവനന്തപുരം-695 001
ഫോൺ-ആഫീസ്: 0471-2335366, 2323633 ഫാക്സ്: 2336677 വസതി: 0471-2314436
മൊബൈൽ: 9495355500, 9447010355
email : minister-education@kerala.gov.in

# *प्रास्ताविकम्*

*प्रियसुहृदः,*

सामान्यशिक्षाविभागेन उच्चविद्यालयछात्राणां पठनस्तरवर्धनाय बहुविधानि प्रवर्तनानि आयोजितानि । तेषामन्यतमत्वेन दशमवर्गस्य छात्राणाम् उपयोगितायै केषाञ्चन पठनप्रवर्तनानाम् आदर्शरूपाण्यत्र प्रकाश्यन्ते । विविधस्तराणां छात्राणां चिन्ताशेषीणां प्रवर्धनं दृढिकरणञ्चोद्दिश्य पाठानां पुनरवलोकनाय च सज्जीकृतमिदं पुस्तकम् । अस्मिन् सञ्चये विविधानि प्रवर्तनानि, प्रश्नमातृकाश्च दत्तानि। छात्राणां बहूपकारकः भवेदेतस्याभ्यासः। अत्र प्रदत्तानि प्रवर्त्तनानि अध्यापकैः कक्ष्यायां निश्चयेन कारयितव्यानि ।

# एककम् १

## उद्योगः कार्यसाधकः

## पाठः १ अभित्तौ चित्रकर्म

**प्रवर्त्तनम् १**

छात्रान् सङ्घान् कृत्वा पाठभागस्य वाचनाय निर्दिशतु । सूचनानां चर्चां कृत्वा उपन्यासं लिखन्तु छात्राः । संङ्घेभ्यः एकैकः अवतारयतु । अध्यापकः संशोधयतु , श्यामफलके लिखतु। ततः छात्राः टिप्पणीपुस्तके निवेशयतु ।

१) सोमदत्तपुत्रः कथं मूषिकवर्तकः इति नाम्ना प्रथितोऽभवत् ? सूचनानुसारं विशदयतु ।

अथवा

२) सोमदत्तपुत्रः किमर्थं विशाखिलं सुवर्णमूषिकम् अदात् ? सूचनानुसारं विशदयतु ।

अथवा

३) उद्योगस्य महत्वम् अभित्तौ चित्रकर्म इति पाठमाधारीकृत्य सूचनानुसारं विशदयतु ।

***सूचनाः-***

सोमदत्तः - मृतः- गर्भवती पत्नी - पुत्रमसूत - समर्थः पुत्रः - विशाखिलस्य भवनगमनं - मृतमूषिकलाभः - मार्जारस्य भक्षणं- चणकविक्रयणं - काष्ठसञ्चयनं - धनार्जनं - धान्यापणं - धनिकत्वं - सुवर्णमूषिकदानं - परिणयः - “मूषिकवर्तकः”- उद्योगी लभते श्रियम् ।

**मूल्यनिर्णयः -आशयग्रहणं , सूचनास्वीकारः, वाक्यशुद्धिः, आशयपूर्णता, टिप्पणेः स्वरूपम् ।**

**प्रवर्त्तनम्  २**

**संङ्घशः करणीयम् ।**

**संभाषणं पूरयतु ।**

राजीवः - नमस्ते । ———— ?

गणेशः - नमस्ते । अहं मातुलस्य गृहं गच्छामि।

राजीवः - —————— ?

गणेशः - कथासरित्सागरः इति ग्रन्थस्य स्वीकरणाय।

राजीवः - ———— ?

गणेशः - सः कथाग्रन्थः । अत्र मूषिकचरितं नाम कथा वर्तते ।

राजीवः - तत् केन विरचितम् ?

गणेशः - ——————।

राजीवः - बस्यानमागच्छति ।

गणेशः - ————।

**मूल्यनिर्णयः - आशयावगमनं , उचितपदप्रयोगः**

**प्रवर्त्तनम्  ३**

**वैयक्तिकरूपेण करणीयम् ।**

**प्रधानकर्म अप्रधानकर्म च विविच्य लिखतु।**

उदाः- महिला जलं गृहं नयति ।

प्रधानकर्म- जलम्    अप्रधानकर्म - गृहम्

१ राजा जनान् अधर्मान् रुणद्धि।

२. वामनः महाबलिं भूमिं याचते ।

३. माता सूपं वटकं पचति।

**उचितमुत्तरं कोष्ठात् निर्धार्य लिखतु ।**

१. बहिः शब्दयोगे ——— विभक्तिः ।  ( तृतीया, पञ्चमी, षष्ठी )

२. —— बहिः उद्यानं भवति।  (गृहं, गृहस्य, गृहात्)

३. —— बहिः वापी वर्तते ।  (मन्दिरस्य, मन्दिरं, मन्दिरात्)

**मूल्यनिर्णयः - आशयावगमनं , उचितपदप्रयोगः, व्याकरणज्ञानम्**

**वाक्येषु योजयतु।**

उदाः - मीरा कवितां रचयति । सा कथां च लिखति । (न केवलं किन्तु )

मीरा न केवलं कवितां किन्तु कथां च लिखति।

१. मनु सम्यक् पठति । सः क्रीडति च।

२. सूर्यः प्रकाशं ददाति। अन्तरीक्षं शुद्धीकरोति।

**मूल्यनिर्णयः - अपग्रथनम् , निगमनम्, पदशुद्धिः**

# एककम् २

## कृषिः मानवजीवातुः

## पाठः २ वृक्षरोपणविधयः

अस्माकं पूर्वे कृषिसम्पत्सु बद्धश्रद्धाः आसन् । वृक्षाणां रोपणाय परिपालनाय च ते ज्ञातवन्तः, ग्रन्थान् रचितवन्तः च । तादृशग्रन्थपरिचयाय इदम् एककं सहायकम् ।

**प्रवर्त्तनम् १**

**वैयक्तिकरूपेण करणीयम् ।**

**यथोचितं योजयतु ।**

| | | |
|---|---|---|
| १. वराहमिहिरः | - | वृक्षचिकित्सा |
| २. वृक्षायुर्वेदः | - | वृक्षरोगः |
| ३. पाण्डुपत्रता | - | बृहत्संहिता |
| ४. विडङ्कघृतपङ्कमिश्रितम् | - | वृक्षरोपणपालनविधिः |

**मूल्यनिर्णयः - अपग्रथनम् , सयुक्तिकलेखनम् , पदशुद्धिः**

**प्रवर्त्तनम् २**

**वैयक्तिकरूपेण करणीयम् ।**

**उदाहरणानुसारं सन्धिच्छेदं करोतु ।**

कांस्कान् - कान् + कान्

तांस्तान् -

देवांस्तान् -

**उदाहरणानुसारं लिखतु**

तैः + एव - तैरेव

बालैः + एव -

नीचैः + एषा -

**मूल्यनिर्णयः - अपग्रथनम् , सयुक्तिकलेखनम् , सन्धिज्ञानम् , निगमनम्**

**प्रवर्त्तनम् ३**

**संङ्घशः करणीयम्**

**खण्डिकां पठित्वा दत्तानां प्रश्नानाम् उत्तराणि लिखतु ।**

श्रीमता वराहमहिराचार्येण विरचितायां बृहत्संहितायां वृक्षायुर्वेदनामकेऽध्याये वृक्षरोपणपालनविधयः प्रतिपादिताः। तथा वृक्षादीनां रोगकारणं चिकित्साविधिं चाधिकृत्य विशदयति । शीतेन,आतपेन, वातेन च वृक्षेषु रोगाः जायन्ते । पाण्डुपत्रता शाखाशोषः, प्रवालानामवृद्धिः, रसस्त्रावः, च मुख्याः रोगाः। रोगनिवारणार्थम् आदौ शस्त्रेण व्रणादिविशोधनं शुष्कशाखाकर्तनं च कुर्यात् । अनन्तरं विडङ्कघृतपङ्कमिश्रितेन लेपनं, क्षीरसंयुक्तेन जलेन सेचनं च कृत्वा रोगनिवारणं कुर्वन्ति।

१. बृहत्संहितायाः कर्ता कः ?

२. वृक्षरोपणपालनविधयः कस्मिन् अध्याये प्रतिपादिताः ?

३. वृक्षाणां रोगकारणानि कानि ?

४. वृक्षेषु जायमानाः मुख्याः रोगाः के ?

५. खण्डिकायां प्रयुक्तं क्त्वान्तं पदं किम् ?

**मूल्यनिर्णयः - अपग्रथनम् , सयुक्तिकलेखनम् , वाक्यशुद्धिः , समीचीनमुत्तरम्**

**प्रवर्त्तनम् ४**

**संङ्घशः करणीयम् ।**

**वृक्षरोपणविधयः इति पाठमाधारीकृत्य प्राचीनाधुनिककालयोः वृक्षाणां चिकित्साविधिमधिकृत्य सूचनानुसारं लघूपन्यासं लिखतु।**

सूचनाः- रोगकारणानि - शीतवातातपाः- मुख्याः रोगाः - व्रणविशोधनम्- शुष्कशाखाकर्त्तनम्- सेचनं - आधुनिकचिकित्सारीतिः- मारकः रासकीटनाशिनीप्रयोगः - जैवकृषिरीतिः ।

**मूल्यनिर्णयः -आशयग्रहणं , सूचनास्वीकारः, वाक्यशुद्धिः, आशयपूर्णता, टिप्पणेः स्वरूपम्**

# *एककम् ३*

## मानवधर्मः

## पाठः ३ गीतामृतम्

**प्रवर्त्तनम् १**

**संङ्घशः करणीयम् ।**

**खण्डिकां पठित्वा दत्तानां प्रश्नानाम् उत्तराणि लिखतु ।**

रमेशः प्रतिदिनम् प्रभाते पञ्चवादने उत्थाय ईश्वरप्रार्थनां करोति । प्रभाते दोशा, मध्याह्ने ओदनं, क्वथितं, तक्रं च, रात्रौ फलानि च भुनक्ति । शान्तस्वभावी सः अपरन् मृदुभाषणं करोति ।

१. रमेशे कस्मिन् गुणः?

२. सः कीदृश तपः आचरति ?

टिट्टु प्रतिदिनं शुचिर्भूत्वा यक्षान् भजते । अतिकटु, अम्लयुक्तं भोजनं भुनक्ति । सः रोगी अभवत् । तथापि तेन ब्रह्मचर्यं च अनुष्ठीयते ।

१.अस्मिन् कः गुणः?

२. एषः कीदृश तपः आचरति ?

कश्चन ग्रामवासी प्रतिदिनं एकाग्रतया प्रेतान् भजते । मलिनानि उच्छिष्टानि अशुद्धानि भोजनानि खादति । सौम्यभावं प्रकटयति च ।

१. तस्मिन् कः गुणः?

२. एषः कीदृशं तपः आचरति ?

**मूल्यनिर्णयः - आशयग्रहणं, सयुक्तिकलेखनम् , विषयावबोधः, समीचीनमुत्तरम्**

**प्रवर्त्तनम् २**

**संङ्घशः करणीयम्**

**सूचनानुसारं श्रीमद्भगवद्गीतामधिकृत्य लघूपन्यासं लिखतु ।**

**सूचनाः** - महाभारतम् - भीष्मपर्व - अष्टादश अध्यायाः - कुरुक्षेत्रे - युद्धसमयः - श्रीकृष्णः अर्जुनः - युद्धात् विरामः - युद्धाय प्रेरणा - उपदेशाः - तत्वशास्त्रम् ।

**सूचनानुसारं आहारस्य त्रैविध्यमधिकृत्य स्ववाक्यैः लघूपन्यासं लिखतु।**

**सूचनाः** -त्रिविधः- आरोग्यदायकं, - कट्वम्लयुक्तं - दुर्गन्धयुक्तं- उच्छिष्टाः ।

**मूल्यनिर्णयः -आशयग्रहणं , सूचनास्वीकारः, वाक्यशुद्धिः, आशयपूर्णता, टिप्पणेः स्वरूपम्**

**प्रवर्त्तनम् ३**

**संङ्घशः करणीयम्**

**श्लोकं पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखतु ।**

यजन्ते सात्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ।।

१. सात्विकाः कान् यजन्ते ?

२. प्रेतान् भूतगणान् च के यजन्ते ?

३. अधोरेखाङ्किकतपदस्य पदच्छेदं लिखतु।

४. भजन्ते इत्यर्थकं पदं चित्वा लिखतु ।

**मूल्यनिर्णयः - अपग्रथनम् , सयुक्तिकलेखनम् , वाक्यशुद्धिः , समीचीनमुत्तरम्**

# एककम् ४

## भारतीयचिकित्सापद्धतिः

## पाठः ४ आयुर्दानं महादानम्

लोके विद्यमानेषु चिकित्साशास्त्रेषु अन्यतमः भवति आयुर्वेदः । भारतीयाचार्याणां योगदानं भवति अयं चिकित्सारीतिः । विदेशीयाः अपि अस्मिन् चिकित्सासम्प्रदाये आकृष्टाः भवन्ति ।

**प्रवर्त्तनम् १**

**संङ्घशः करणीयम्**

**"रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता" इति वाक्यानुसारं आरोग्यमधिकृत्य टिप्पणीं लिखतु।**

**सूचनाः** - वाग्भटः,- अष्टाङ्गहृदयः - शरीरं- पञ्चभूतानि - त्रयः दोषाः - वैषम्यं रोगः - साम्यम् आरोग्यम् ।

**मूल्यनिर्णयः -आशयग्रहणं , सूचनास्वीकारः, वाक्यशुद्धिः, आशयपूर्णता, टिप्पणेः स्वरूपम्**

**प्रवर्त्तनम् २**

**संङ्घशः करणीयम्**

**आयुर्दानं महादानम् इति पाठं शब्दकोशं च पठित्वा उदाहरणानुसारं अधोदत्तां पट्टिकां पूरयतु।**

| अष्टाङ्गानि | नामान्तरं | प्रतिपाद्यविषयः | प्रामाणिकग्रन्थः | अलोप्पति नाम |
|---|---|---|---|---|
| बालचिकित्सा | कौमारभृत्यम् | मातृशिशुसंरक्षणं | काश्यपसंहिता | Paediatrics |
| | | | | |
| | | | | |

**मूल्यनिर्णयः - आशयग्रहणम् , चयनसामर्थ्यम् , समीचीनेनोत्तरेण पूरणम्**

**प्रवर्त्तनम्  ३**

**वैयक्तिकरूपेण करणीयम्** ।

**यथोचितं योजयतु** ।

| | | |
|---|---|---|
| १. ऊर्ध्वाङ्गचिकित्सा | - | यज्ञहोमादयः |
| २. शल्यचिकित्सा | - | कश्यपसंहिता |
| ३. जराचिकित्सा | - | सर्पदंशनचिकित्सा |
| ४. वृषचिकित्सा | - | चरकसंहिता |
| ५. बालचिकित्सा | - | वाजीकरणतन्त्रम् |
| ६. कायचिकित्सा | - | आरोग्यं, कर्मसौष्ठवम् |
| ७. ग्रहचिकित्सा | - | शालाक्यतन्त्रम् |
| ८. दंष्ट्राचिकित्सा | - | शस्त्रक्रियाप्रधानः |

**मूल्यनिर्णयः - अपग्रथनम् , सयुक्तिकलेखनम् , आशयज्ञानम्**

# एककम्  ५

## संस्कृतिः

## पाठः ५ सुयोधनस्य राजनीतिः

**प्रवर्त्तनम् १**

**संङ्घशः करणीयम्** ।

**खण्डिकां पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखतु**

पराजयं विशङ्क्य दुर्योधनः नयेन राज्यं वशीकर्तुम् इच्छति। सः स्वस्य कीर्तिं प्रसारयति । दिनरात्रान् विभज्य पुरुषार्थान् सम्यक् परिगणयति । निरहङ्कारी सः भृत्येषु, सुहृत्सु, बन्धुषु च आदरं प्रकटयति । कोपरहितः सः गुरूपदेशेन दण्डेन अधर्मान् निवारयति । कृषीवलेभ्यः सुखेन जलं ददाति । अस्य शासनं अन्यैः माल्यमिव स्वीकरोति।

१. दुर्योधनः किम् इच्छति?

२. सः केषु आदरं प्रकटयति ?

३. सः कथं अधर्मान् निवारयति ?

४. ल्यबन्तानि पदानि चित्वा लिखतु ।

**मूल्यनिर्णयः - अपग्रथनम् , सयुक्तिकलेखनम् , वाक्यशुद्धिः , समीचीनमुत्तरम् ।**

**प्रवर्त्तनम् २**

**वैयक्तिकरूपेण करणीयम् ।**

**अधोदत्तेभ्यः राजशासनपराणि, प्रजाशासनपराणि च वाक्यानि विवच्य पट्टिकां करोतु ।**

( कृषिं प्रोत्साहयति, यशः तनोति, रक्षान् परितः विधास्यते, करं स्वीकरोति, वचनानि सर्वे अङ्गीकुर्वन्ति, समीचीनां दण्डरीतिं प्रचालयति)

**मूल्यनिर्णयः - आशयावगमनम्, सयुक्तिकलेखनम् , पट्टिकाकरणम् ।**

**प्रवर्त्तनम् ३**

**वैयक्तिकरूपेण करणीयम् ।**

**उदाहरणानुसारं वाक्यानि परिवर्तयतु।**

जनाः शासनरीतिं शिरोभिः वहन्ति । (कर्तरी)

जनैः शासनरीतिः शिरोभिः उह्यते । (कर्मणि)

१. बृहत्संहितायां कृषिरीतिं वर्णयति ।

२. युवकः चणकानि ददाति ।

३. दुर्योधनः जयं इच्छति ।

४. सः पौरुषं वितनोति ।

५. राजा अधर्मान् निवारयति ।

६. दुर्योधनः यशः तनोति।

**कर्मणिप्रयोगे क्रियाधातुभिः सहः 'य' प्रत्ययः, आत्मनेपदप्रत्ययाश्च योजनीयः ।**

**मूल्यनिर्णयः - अपग्रथनम् , प्रयोगपाटवं , वाक्यशुद्धिः , समीचीनमुत्तरम् ।**

**प्रवर्त्तनम् ४**

**संङ्घशः करणीयम् ।**

**खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखतु ।**

महाकविना भारविणा प्रणीतं महाकाव्यं भवति किरातार्जुनीयम् । काव्यमिदं पञ्चमहाकाव्येष्वन्यतममिति गण्यते । कव्येऽस्मिन् अर्जुनस्य पाशुपतास्त्रलाभ वर्ण्यवषयत्वेन स्वीकृतः । तदनुबन्धविषयाः एव अत्र मनोहारितया वर्ण्यन्ते । "भारवेरर्थगौरवम्" इति प्रथायाः सार्थकता काव्यस्यास्य पठनेन अवगन्तुं शक्यते।

१. किरातार्जुनीयस्य कर्ता कः?

२. कविमधिकृत्य प्रथा का ?

३. काव्यस्य वर्ण्यविषयः कः?

४. खण्डिकातः आत्मनेपदक्रियारूपाणि चित्वा लिखतु ।

५. अधोरेखाङ्कितपदस्य सन्धिच्छेदं लिखतु ।

**मूल्यनिर्णयः - अपग्रथनम् , सयुक्तिकलेखनम् , वाक्यशुद्धिः , समीचीनमुत्तरम् ।**

**प्रवर्त्तनम् ५**

**वैयक्तिकरूपेण करणीयम् ।**

**उचिमुतरं कोष्ठकात् निर्धार्य लिखतु ।**

१.समर्थनीयस्यार्थस्य समर्थनम् कः अलङ्कारः ?

(उत्प्रेक्षा, काव्यलिङ्गम्, अर्थान्तरन्यासः)

२. "समुन्नयन् भूतिमनार्यसंगमाद्वरं विरोधोऽपि समं महात्मभिः" अत्र कः अलङ्कारः ? (अर्थान्तरन्यासः,उत्प्रेक्षा, काव्यलिङ्गम्, )

३. सामान्यविशेषयोः उक्तिः कः अलङ्कारः ?

(काव्यलिङ्गम्,अर्थान्तरन्यासः, उत्प्रेक्षा, )

४. सम्भवना स्यात् ——— अलङ्कारः ।

(उत्प्रेक्षा, काव्यलिङ्गम्, अर्थान्तरन्यासः)

**मूल्यनिर्णयः - अपग्रथनम् , सयुक्तिकलेखनम् , समीचीनमुत्तरम् ।**

# पाठः ६ यागाश्वबन्धनम्

**प्रवर्त्तनम् १**

**संङ्घशः करणीयम्** ।

**खण्डिकां पठित्वा प्रश्नानां उत्तराणि लिखतु ।**

**यागश्वबन्धनमिति पाठस्य आमुखं पठित्वा (पा. पु. पु . सं ६५ ) प्रश्नोत्तरकेलीं चालयतु** ।

उदाः- १ उत्तररामचरितस्य कर्ता कः ?

उत्तररामचरितस्य कर्ता भवभूतिः भवति ।

२. अस्य नाटकस्य प्रधानरसः कः ?

अस्य नाटकस्य प्रधानरसः करुणरसः भवति।

**मूल्यनिर्णयः - अपग्रथनम् , वाक्यशुद्धिः , समीचीनप्रश्नोत्तरम् ।**

**प्रवर्त्तनम् २**

**वैयक्तिकरूपेण करणीयम्** ।

**लवस्य स्वभावमधिकृत्य सूचनानुसारं लघूपन्यासं लिखतु।**

**सूचनाः -** उत्तररामचरितम् - भवभूतिः- यागाश्वबन्धनम् - धीरता - प्रायोगपाटवं- क्षात्रवीर्यं - निर्भयता - युद्धसन्नद्धता ।

**मूल्यनिर्णयः -आशयग्रहणं , सूचनास्वीकारः, वाक्यशुद्धिः, आशयपूर्णता, टिप्पणेः स्वरूपम्**

**प्रवर्त्तनम् ३**

**संङ्घशः करणीयम्** ।

**सूचनानुसारं अश्वस्य वर्णनां लिखतु ।**

**सूचनाः** - उत्तररामचरितम्- भवभूतिः- यागाश्वबन्धनम्- पुच्छं- दीर्घग्रीवः- खुराः - शष्पाणि - आम्रमात्रपिण्डं - दूरेगमनं।

**मूल्यनिर्णयः -सूचनास्वीकारः, वाक्यशुद्धिः, आशयपूर्णता, टिप्पणेः स्वरूपम्**

**प्रवर्त्तनम् ४**

**वैयक्तिकरूपेण करणीयम् ।**

**यथोचितं योजयतु ।**

| | | |
|---|---|---|
| १. धिक् | - | वृत्तम् |
| २. स्वभावोक्तिः | - | चन्द्रकेतुः |
| ३. शार्दूलविक्रीडितम् | - | रसना |
| ४. लक्ष्मणसुतः | - | द्वितीया |
| ५. जिह्वा | - | अलङ्कारः |

**मूल्यनिर्णयः - अपग्रथनम् , सयुक्तिकलेखनम् , आशयज्ञानम्**

**प्रवर्त्तनम् ५**

**संङ्घशः करणीयम् ।**

**अधोदत्तश्लोकानुसारं लवस्य चापवर्णनां स्ववाक्यैः लिखतु ?**

ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र-
मुद्गारिघोरघनघर्घरघोषमेतत् ।
ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र-
जृम्भाविडम्बिविकटोदरमस्तु चापम् ।।

**मूल्यनिर्णयः -आशयग्रहणं , सूचनास्वीकारः, वाक्यशुद्धिः, आशयपूर्णता, टिप्पणेः स्वरूपम्**

**प्रवर्त्तनम् ६**

**वैयक्तिकरूपेण करणीयम् ।**

१ ——— प्रति । (रामः , रामं, रामस्य)

२. ————प्रति । (गृहं, गृहाय, गृहात्)

३. प्रति शब्दयोगे ———। ( तृतीया, द्वितीया, पञ्चमी)

**मूल्यनिर्णयः - आशयावगमनम् , उचितपदप्रयोगः, प्रयोगपरिचयः**

# पाठः ७ केरलीयकलारूपाणि

**प्रवर्त्तनम् १**

**वैयक्तिकरूपेण करणीयम् ।**

**खण्डिकां पठित्वा मातृभाषायां विवर्तयतु ।**

कलाः न केवलं विनोददायकाः किन्तु समाजपरिष्करणसमर्थाश्च भवन्ति। केरलेषु प्रचुरप्रचारमाप्तानि चाक्यार्कूत्त्, पाठकं, हरिकथा , पूरकलि इत्यादि कलारूपाणि संस्कृतभाषासंबन्धीनि। अत एव कलारूपाणि भाषायाः, संस्कृतेः च पोषकाणि संरक्षकाणि च भवन्ति । तथा च जनानां मिथः ऐक्यबोधं वर्धयितुं सहायकानि। देशानुसारं कलानामपि वैविध्यं वर्तते ।

**मूल्यनिर्णयः -आशयग्रहणम् , वाक्यशुद्धिः, आशयपूर्णता, परिवर्तनशेषिः**

**प्रवर्त्तनम् २**

**वैयक्तिकरूपेण करणीयम्।**

**सूचनानुसारं पाठकं चाक्यार्कूत्त् एतयोः साजात्यवैजात्यानि पट्टिकां करोतु**

(अवतारणं- वेषविधानं- वाद्योपकरणं- कथातन्तु- रसः)

अथवा

**सूचनानुसारं हरिकथा पाठकं एतयोः साजात्यवैजात्यानां पट्टिकां करोतु**

(अवतारणं - वेषविधानं - वाद्योपकरणं - कथातन्तु- अभिनयः)

**मूल्यनिर्णयः -आशयग्रहणं , सूचनास्वीकारः, वाक्यशुद्धिः, आशयपूर्णता, टिप्पणेः स्वरूपम्**

**प्रवर्त्तनम् ३**

**संङ्घशः करणीयम् ।**

**सूचनानुसारं कलानामाविर्भावं प्रयोजनानि चाधारीकृत्य लघूपन्यासं लिखतु**

**सूचनाः -** जिवितशैली - संस्कृतिः - देशः - मनोरञ्जकं - आरोग्यपरिपालनं- ज्ञानदायकं - देशबोधः - एकताबोधः ।

**मूल्यनिर्णयः -आशयग्रहणं , सूचनास्वीकारः, वाक्यशुद्धिः, टिप्पणेः स्वरूपम्**

**प्रवर्त्तनम् ४**

**संङ्घशः करणीयम्** ।

**सूचनानुसारं कलरिपयट्ट् अधिकृत्य लघूपन्यासं लिखतु ।**

**सूचनाः -** आयोधनकला - सैनिकपरिशीलनाय कलरि - खलूरिका - प्रणेता परशुरामः -कूटियाट्टं कथाकेल्यादिषु स्वाधीनता ।

**मूल्यनिर्णयः -आशयग्रहणं , सूचनास्वीकारः, वाक्यशुद्धिः, आशयपूर्णता, टिप्पणेः स्वरूपम्**

# पाठः ८ सुरायाः असुरता

**प्रवर्त्तनम् १**

**संङ्घशः करणीयम्** ।

**संभाषणं पूरयतु ।**

किशोरः - नमस्ते । आगच्छामि वा ?

वैद्यः - नमस्ते , आगच्छतु । ——————?

किशोरः - मम उदरवेदना न न्यूना । अधिकतया अस्ति ।

वैद्यः - —————————— ?

किशोरः - आम् ,औषधं यथाविधि सेव्यते ।

वैद्यः - मद्यपानेन भवतः यकृत् (करल्) संपूर्णतया विनष्टम्।

किशोरः - —————————— ?

वैद्यः - मद्यपानं त्यजतु । स एव मार्गः ।

किशोरः - ——————————?

वैद्यः - शनैः शनैः मद्यपानं वर्जयतु ।

**मूल्यनिर्णयः - आशयावगमनम् , उचितपदप्रयोगः ।**

**प्रवर्त्तनम् २**

**वैयक्तिकरूपेण करणीयम् ।**

**यथोचितं योजयतु।**

| | | |
|---|---|---|
| १. कपिलवस्तु | - | सन्यासी |
| २. जातकमाला | - | मद्यपानासक्तिः |
| ३. वारुणः | - | देवाधिपः |
| ४. वारुणी | - | श्रीबुद्धः |
| ५. अकल्याणमित्रसम्पर्कदोषः | - | सर्वमित्रम् |
| ६. श्रावस्तीनगरं | - | कुम्भजातकम् |
| ७. बोधिसत्वः | - | मद्यम् |

**मूल्यनिर्णयः - अपग्रथनम् , सयुक्तिकलेखनम् , आशयज्ञानम्**

**प्रवर्त्तनम् ३**

**संङ्घशः करणीयम् ।**

**सूचनानुसारं मद्यस्य तथा इतरेषाम् उन्मादकवस्तूनां च उपयोगं त्यजेत् इति उद्बोधनाय एकं लघूपन्यासं लिखतु ।**

**सूचनाः -** आरोग्यहानिकरं - उन्मादकं - स्वबुद्धिनाशः- धननष्टं- कुटुम्बनाशः - रोगाः - युवजनानां बोधवत्करणं- दूष्याशानां अवबोधनम् ।

**मूल्यनिर्णयः -आशयग्रहणं , सूचनास्वीकारः, वाक्यशुद्धिः, आशयपूर्णता, टिप्पणेः स्वरूपम्**

**प्रवर्त्तनम् ४**

**वैयक्तिकरूपेण करणीयम् ।**

लहरिपदार्थानां दोषान् अधिकृत्य उद्बोधनाय भित्तिपत्राणि रचयतु ।

उदाः-

| |
|---|
| कुटुम्बं स्मर । मद्यं त्यज । |

**मूल्यनिर्णयः - सयुक्तिकलेखनम् , आशयज्ञानम्, उचितपदप्रयोगः**

# एककम् ६

## वास्तुविद्या

## पाठः ९ दिशानिर्णयः

**प्रवर्त्तनम् १**

**वैयक्तिकरूपेण करणीयम् ।**

**यथोचितं योजयतु ।**

| | | |
|---|---|---|
| १. वास्तुविद्या | - | वराहमिहिरः |
| २. श्रीमङ्गलं श्रीनीलकण्ठमूसद् | - | ब्रह्मसूत्रम् |
| ३. दिशानिर्णयसामग्री | - | स्थापत्यवेदः |
| ४. बृहत्संहिता | - | मनुष्यालयचन्द्रिका |
| ५. पूर्वपश्चिमरेखा | - | शङ्कुः |

**मूल्यनिर्णयः - अपग्रथनम् , सयुक्तिकलेखनम् , आशयज्ञानम्**

**प्रवर्त्तनम् २**

**संङ्घशः करणीयम् ।**

**प्राचीनकाले दिशानिर्णयः कथं कृतः इति सूचनानुसारं लिखतु।**

**सीचनाः -** भूमेः समीकरणम् - शङ्कुस्थापनम् - आरं कृत्वा वृत्तरचना -
शङ्कुछाया - ब्रह्मसूत्रं - वृत्तसंगमः - मत्यचिह्नं -
पूर्वपश्चिमरेखा - यमसूत्रम् ।

**मूल्यनिर्णयः -आशयग्रहणम् , सूचनास्वीकारः, वाक्यशुद्धिः, आशयपूर्णता,
टिप्पणेः स्वरूपम्**

**प्रवर्त्तनम् ३**

**वैयक्तिकरूपेण करणीयम् ।**

**अधोदत्तेषु ग्रन्थः कर्ता च पट्टिकां करोतु ।**

मयमतम् मानसारम्, मयः, विश्वकर्मप्रकाशकः, भोजगाजः, श्रीकुमारः, विश्वकर्मा, समराङ्कणसूत्रधारः, भास्कराचार्यः, शिल्परत्नम्, मानसारऋषिः, भास्करीयम्

| ग्रन्थः | कर्तुः नाम |
|---|---|
| | |

**मूल्यनिर्णयः - आशयग्रहणम् , चयनसामर्थ्यम् , समीचीनेनोत्तरेण पूरणम् ।**

# एककम् ७

## मानवधर्मः

## पाठः १० योगिनः सर्वसेवकाः

आमुखम्

मानवानां धर्मः भवति मानवधर्मः । परोपकारार्थमिदं शरीरं इत्याप्तवाक्यं भरतसंस्कृतेः मानवधर्मस्य आधारशिलैव भवतिः । अस्मिन्नर्थे समाजसेवा भवति मानवधर्मः । एकान्तवासिनः सन्यासिनः अपि समाजसेवां कुर्वन्तः सन्ति इति ज्ञातुं शक्यते ।

**प्रवर्त्तनम् १**

**वैयक्तिकरूपेण करणीयम् ।**

**यथोचितं योजयतु ।**

| | | |
|---|---|---|
| १. ईश्वरदर्शनम् | - | आत्मशान्तिः |
| २. तपोवनस्वामी | - | खण्डकाव्यम् |
| ३. विभाकरम् | - | जीवनचरितम् |
| ४. सुरनदीह्लदः | - | सुब्रहमण्यः |

**मूल्यनिर्णयः - अपग्रथनम् , सयुक्तिकलेखनम् , आशयज्ञानम्**

**प्रवर्त्तनम् २**

**वैयक्तिकरूपेण करणीयम् ।**

**सूचनानुसारं जीवचरित्रं लिखतु ।**

| | | |
|---|---|---|
| नाम | - | के पि केशवमेनवः |
| जन्म | - | १८८६ |
| पितरौ | - | भीमनाच्चः, मीनाक्षी नेत्यारम्मा च |
| विद्याभ्यासः | - | लण्डन् बारिस्टर् बिरुदम् |
| कर्मक्षेत्रं | - | भारतदेशीयप्रस्थानम् |
| ग्रन्थाः | - | बिलात्तिविशेषम्, कषिञ्ञकालम् |
| मरणम् | - | १९७८ |

**मूल्यनिर्णयः -सूचनास्वीकारः, वाक्यशुद्धिः, आशयपूर्णता, टिप्पणेः स्वरूपम्**

**प्रवर्त्तनम् ३**

**वैयक्तिकरूपेण करणीयम् ।**

**कोष्ठात् उचितमुत्तरं निर्धार्य लिखतु ।**

१. तपोवनस्वामिना विरचितं खण्डकाव्यम्
(विष्णुयमकं, कैलासयात्रा, विभाकरं)

२. तपोवनस्वामी कस्मिन् ग्रामे अजायत ?
(चेम्पषन्ति, मुटप्पल्लूर्, कालटिः)
३. तपोवनस्वामिना विरचितः ग्रन्थः ।
(हिमगिरिविहारः, नवभारतम्, गङ्गाष्टकं )
४. अस्मिन् दुःखसंकुले लोके परमः आश्वासः कः ?
(सुरनदीह्लदः, आत्मशान्तिः, एकान्तवासः)

**मूल्यनिर्णयः - आशयावगमनम् , उचितपदप्रयोगः, प्रयोगपरिचयः**

# पाठः ११ दीक्षान्तोपदेशः

**प्रवर्त्तनम् १**

**सङ्घरूपेण करणीयम् ।**

**समाप्तविद्यं शिष्यं गृहस्थाश्रमाय प्रेरयित्वा गुरोः उपदेशं सूचनाननुसारं लिखतु ।**

**सूचनाः -** वेदाध्ययनानन्तरं- सत्यं वद- गुरुदक्षिणा- प्रजातन्तुं- मा व्यवच्छेत्सीः - सत्याद्-धर्माद् - कुशलाद्- मा प्रमदितव्यम्- स्वाध्यायप्रवचनम् - देवपितृकार्यम् ।

**मूल्यनिर्णयः -सूचनास्वीकारः, वाक्यशुद्धिः, आशयपूर्णता, टिप्पणेः स्वरूपम्**

**प्रवर्त्तनम् २**

**वैयक्तिकरूपेण करणीयम् ।**

**उदाहरणानुसारं समस्तपदं लिखतु ।**

उदाः - माता देवः यस्य सः - मातृदेवः
पिता देवः यस्य सः ——————
आचार्यः देवः यस्य सः - ——————

**मूल्यनिर्णयः - आशयावगमनम् , उचितपदप्रयोगः**

**प्रवर्त्तनम् ३**

**वैयक्तिकरूपेण करणीयम् ।**

**यथोचितं योजयतु ।**

| | | |
|---|---|---|
| १. उपनिषद् | - | कर्मकाण्डः |
| २. कृष्णयजुर्वेदः | - | शङ्कराचार्यः |
| ३. धर्मम् अनुतिष्ठ | - | वेदान्तः |
| ४. वेदस्य पूर्वभागः | - | तैत्तरीयोपनिषद् |
| ५ उपनिषद्भाष्यम् | - | धर्मं चर |

**मूल्यनिर्णयः - अपग्रथनम् , सयुक्तिकलेखनम् , आशयज्ञानम्**

**प्रवर्त्तनम् ४**

**वैयक्तिकरूपेण करणीयम् ।**

**उदाहरणानुसारं सन्धिच्छेदं करोतु ।**

| | | | | |
|---|---|---|---|---|
| १. सत्यान्न | - | सत्यात् | + | न |
| २. धर्मान्न | - | | + | |
| ३. कुशलान्न | - | | + | |
| ४. तपस्तपे | - | | + | |

**उदाहरणानुसारं वाक्येषु योजयतु**

पिता वदति । पुत्रः अनुसरति । (यथा - तथा)

यथा पिता वदति तथा पुत्रः अनुसरति ।

१. टोपीकारः टोपिकां क्षिपति। वनराः अनुकुर्वन्ति ।

२. संस्कृतं पठति। संस्कृतिः ज्ञायते।

३. विद्याभ्यासः समाप्यते। गुरुः उपदेशान् ददाति ।

४. राजीवः प्रार्थयति । ईश्वरः अनुग्रहं ददाति।

**मूल्यनिर्णयः - आशयावगमनं , उचितपदप्रयोगः, प्रयोगपरिचयम् ,**

**प्रवर्त्तनम् ५**

**वैयक्तिकरूपेण करणीयम् ।**

**अधोदत्तेषु वैयक्तिक-पारिवारिक-सामाजिक उपदेशानां पट्टिकां कृत्वा लिखतु**

(मातृदेवो भव , श्रद्धया देयम्, सत्यं वद, भिया देयम् स्वाध्यायान्मा प्रमदः, आचार्यदेवो भव)

**मूल्यनिर्णयः - आशयग्रहणम् , चयनसामर्थ्यं , समीचीनेनोत्तरेण पूरणम्**

# MODEL QUESTION PAPER
## मातृकाप्रश्नपत्रम्
## एस् .एस् .एल् .सि .परीक्षा २०१४-१५
## संस्कृतम्

अङ्कः - 40

समयः - 90 निमेषाः

**I यथोचितं योजयत ।** **5**

| | | |
|---|---|---|
| १. मूषिकवर्तकः | - | अगदतन्त्रम् |
| २. पाण्डुपत्रता | - | पारिवारिकम् |
| ३. मनुष्यालयचन्द्रिका | - | वृक्षरोपणम् |
| ४. दंष्ट्राचिकित्सा | - | श्रीनीलकण्ठमूसत् |
| ५. मातृदेवो भव | - | वैश्यपुत्रः |
| | - | श्रीनीलकण्ठशर्मा |

**II अधोदत्तं संभाषणं पूरयतु ।** **4**

रमा - मतः अहं गच्छामि।

माता - ________________ ?

रमा - अद्य मन्दिरे कूटियाट्टं प्रचलति ।

माता - ____________________?

रमा - सीतापहरणं कथां अवतारयति ।

माता - ___________________ ?

रमा - मया साकं मातामही वर्तते ।

माता - श्रद्धया गच्छतु पुत्री ।

रमा - __________________।

**III अधोदत्तेषु आयुर्वेदस्य स्वरूपं वर्ण्यमानं श्लोकं चित्वा लिखतु 2**

१ आयुः सत्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्या स्निग्धाः स्थिरा हृद्या आहारा सात्विकप्रियाः ।।

२. हिताहितं सुखं दुखम् आयुस्तस्य हिताहितम् ।
मानं च तच्च यत्रोक्तं आयुर्वेद स उच्यते ।।

**IV श्लोकं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखतु । 4**

गद्यपद्यात्मिकया चम्पुकाव्यशैल्या आर्यशूरेण विरचिता जातकमाला सुप्रसिद्धा। श्रीबुद्धदेवस्य पूर्वजन्मकथाः एव जातकमाला अथवा जातककथाः इत्युच्यन्ते । अस्यां बोधिसत्वः प्रधानकथापात्रत्वेन दृश्यते ।

१. जातकमालायाः नामान्तरं किम्?

२. जातकमालायाः कर्ता कः ?

३. अधोरेखाङ्कितपदस्य सन्धिच्छेदं कुरुत

४. चम्पुकाव्यशैल्याः सविशेषता का ?

**V उदाहरणानुसारं वाक्येषु योजयतु । 1**

उदाः - गीता नृत्यति। सा गायति च (न केवलं किन्तु)
गीता न केवलं नृत्यति किन्तु गायति च।
चित्रा सम्यक् पठति । सा चित्राणि रचयति च।

**VI सूचनानुसारं श्रद्धात्रयमधिकृत्य लघुटिप्पणीं लिखतु । 4**

**सूचनाः** - भगवद्गीता - श्रद्धात्रयविभागयोगः - त्रिविधः - श्रद्धा - सत्वानुरूपा - श्रद्धामयः ।

**VII अधोदत्तेषु उपनिषदः वेदान् च विविच्य पट्टिकां करोतु। 2**

(तैत्तरीयम् , यजुः , छान्दोग्यं , ईशावास्यं , सामं , बृहदारण्यकं , अथर्वं, ऋक् )

**VIII मद्यवर्जनबोधवत्करणाय एकां भित्तिपत्रिकां निर्मातु । 2**

**IX उदाहराणानुसारं मुख्यकर्म गौणकर्म च विविच्य लिखतु । 2**

मातुलः भागिनेयं ग्रन्थालयं नयति ।

उत्तरं - मुख्यकर्म - भागिनेयं , गौणकर्म - ग्रन्थालयं

१. देवाः अमृतं क्षीरनिधिम् अमथ्नन् ।

**X कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखतु। 3**

१. जातकमालायाः कर्ता कः ? (सोमदेवः, आर्यशूरः, भवभूतिः)

२. धिक् ——— । (जल्पनेन, जल्पनं, जल्पनः)

३. गद्यपद्यमयं —— इति अभिधीयते । (चम्पू, नाटकं, रूपकं)

**XII सूचनानुसारं उत्तररामचरितमधिकृत्य लघूपन्यासम् लिखतु । 5**

**सूचनाः -** भवभूतिः - नाटकचक्रं - प्रथा - रामायणं - सप्तभिः अङ्कैः - रसः - श्रेष्ठतरम् ।

**XIII उदाहरणानुसारं समस्तपदं लिखतु । 1**

गतः आमयः यस्य सः - गतामयः

गतः स्मयः यस्य सः - ————।

**XIV प्रादेशिकभाषायां विवर्तयतु । 5**

हैन्तवाराधनालयेषु प्रचलिता प्रसिद्धा केरलीयकला भवति कूत्त् । अस्याः अवतारकः चाक्यारः इत्यतः चाक्यार्कूत्त् इति व्यवह्रियते । सामान्यजनेषु धार्मिकविचारोत्पादनं एतस्य कलारूपस्य मुख्यमुद्देश्यम् । हास्यरसप्रधानेऽस्मिन् कलारूपे चतुर्विधाभिनयप्रकाराः सन्निवेशिताः भवन्ति । अत्र मिषाव् नट्वाड्क्प्रभृतीनि वाद्योपकरणानि उपयुज्यन्ते ।

*** *** ***

# MODEL QUESTION PAPER

## मातृका प्रश्नपत्रम्

## एस् एस् एल् सि परीक्षा २०१४-१५

## संस्कृतम्

अङ्कः - 40

समयः - 90 निमेषाः

---

**I यथोचितं योजयत ।** **5**

| | | |
|---|---|---|
| १. कृष्णयजुर्वेदः | - | भवभूतिः |
| २. ब्रह्मसूत्रम् | - | तपोवनचरितम् |
| ३. ग्रहचिकित्सा | - | तैतरीयोपनिषद् |
| ४. उत्तररामचरितम् | - | पूर्वपश्चिमरेखा |
| ५. ईश्वरदर्शनम् | - | भूतविद्या |

**II अधोदत्तं संभाषणं पूरयतु ।** **4**

पुत्रः - प्रमुखाः आयुर्वेदग्रन्थाः के ?

पिता - ———, अष्टाङ्गहृदयः, चरकसुश्रुतसंहिते च ।

पुत्रः - ——————————?

पिता - वाग्भटेन विरचितम् भवति।

पुत्रः - अत्र मानसिकारोग्यसंरक्षणं कस्मिन् अङ्गे वर्तते?

पिता - ———— ।

पुत्रः - ————?

पिता - ऊर्ध्वाङ्गचिकित्सायां प्रतिपादितं भवति।

**III सूचनानुसारं वृक्षादीनां रोगकारणानि तेषां चिकित्सारीतिं च आधारीकृत्य लघुटिप्पणीं लिखतु ।** **4**

**सूचनाः** - शीतेन - आतपेन - पाण्डुपत्रता - रसस्रावः - व्रणादिविशोधनम् - लेपनं - क्षीरसंयुक्तजलसेचनम् ।

**IV अधोदत्तेषु सर्वस्य श्रद्धा सत्वानुरूपा भवति इत्याशययुक्तं श्लोकं चित्वा लिखतु ।** **2**

१ त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्विकी राजसी चैव तामसी चेति तां श्रृणु।।

२. सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत !।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ।।

**V श्लोकं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखतु ।** **4**

कृतारिषड्वर्गजयेन मानवी-
मगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तंदिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम् ।।

१. कथं पौरुषं वितन्यते ?
२. कीदृशीं पदवीं प्राप्तुं इच्छति?
३. अधोरेखाङ्कितपदस्य सन्धिच्छेदं कुरुत
४. अस्मिन् श्लोके "अहोरात्रं" इत्यर्थे प्रयुक्तं पदं किम् ?

**VI उदाहरणानुसारं समस्तपदं लिखतु ।** **1**

महान् च असौ धनिकः च - महाधनिकः । एवंचेत्
महान् च असौ तापसः च - ________।

**VII अधोदत्तेषु हरिकथा पाठकम् एतयोः साजात्यवैजात्यनि च विविच्य पट्टिकां करोतु।** **3**

(इतिवृत्तम् ,वेषः ,वाद्योपकरणम् ,रसः ,अभिनयः ,अवतारणम् )

**VIII सूचनानुसारं श्रीनारायणगुरुदेवस्य जीवनचरितं लिखतु। 5**

| | | |
|---|---|---|
| नाम | - | नारायणः |
| जन्म | - | १८५६ (1856) |
| पिता | - | माटनाशान् |
| माता | - | कुट्टियम्मा |
| जन्मस्थानम् | - | चेम्पषन्ति ग्रामे वयलवारे |
| अपरनाम | - | नाणु |
| विद्याभ्यासः | - | संस्कृतभाषायां आयुर्वेदे च निष्णातः |
| सिद्धान्तः | - | एका जातिः, एको धर्मः, एको देवः मानवानाम् |
| मरणम् | - | १९२८ (1928) |

**IX कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखतु। 3**

१. तपोवनस्वामिनः पूर्वाश्रमनामधेयं किं?
(नरेन्द्रः , गदाधरः, सुब्रह्मण्यः)

२. श्रीमद्भगवद्गीता महाभारते कस्मिन् पर्वणि अन्तर्भवति ?
(शल्यपर्वणि, भीष्मपर्वणि, द्रोणपर्वणि)

३. श्रीबुद्धस्य पूर्वजन्मकथा भवति।
(पञ्चतन्त्रं, हितोपदेशः, जातकमाला)

**X सुरायाः स्वरूपं बोधिसत्वेन कथं वर्णितम् ? 3**

**XI उदाहरणानुसारं वाक्येषु योजयतु । 1**

उदाः - मनोहरः शीघ्रं आगच्छति। यानं लभेत (यदि-तर्हि)
यदि मनोहरः शीघ्रं आगच्छति तर्हि यानं लभेत ।

राहुल् सम्यक् अधावत् । सः विजयी भवेत् ।

**XII प्रादेशिकभाषायां विवर्तयतु । 5**

भारतीयाः गृहनिर्माणविषये प्राचीनकालादारभ्यैव बद्धश्रद्धाः आसन् । उचितस्थानादिकं परिगणयन् ते गृहनिर्माणं कुर्वन्ति। वास्तुशास्त्रप्रकारेण तैः गृहाः निर्मीयन्ते । केरलेषु वास्तुशास्त्रं तच्चुशात्रं इति नाम्ना प्रसिद्धः। मनुष्यालयचन्द्रिका अत्र प्रसिद्धः ग्रन्थः भवति।

**********

# मातृकाप्रश्नाः

१.जनकादयः केन संसिद्धिमास्थिताः ?

२. विशाखिलेन वैशपुत्राय दत्तं मूलधनं किम् ?

३.बहिः शब्दयोगे का विभक्तिः ?

४. पञ्चत्वम् इत्यस्य अर्थः कः ?

५. आरामे रोपणीयाः वृक्षाः के ?

६. वृक्षेषु जायमानाः रोगाः के ?

७. वर्षासु रोपणीया वृक्षाः कीदृशाः ?

८. अजाताशाखाः वृक्षाः कदा रोपणीयाः ?

९. भगवद्गीता कस्मिन् ग्रन्थे अन्तर्भवति ?

१०. मनसः एकाग्रता किम् ?

११. भावसंशुद्धिः कीदृशं तपः ?

१२. आयुर्वेदस्य स्तम्भत्रयं किम् ?

१३. आयुर्वेदमनुसृत्य रोगकारणं कुत्र प्रतिपाद्यते ?

१४. मानसिकारोग्यसंरक्षणं कुत्र प्रतिपादितम् ?

१५. शस्त्रक्रियायाः भारतीयाचार्यः कः ?

१५. वैद्यः इत्यर्थकं पदम् (वणक् , भिषक्, वैश्यः)

१६. स्वराज्यं विनष्टः युधिष्ठिरः कुत्र अवसत् ?

१७. छद्म इत्यस्य अर्थः कः ?

१८ दुर्योधनः दुर्जनसंसर्गापेक्षया किं वरं मन्यते ?

१९. काव्यलिङ्कालङ्कारस्य लक्षणं किम् ?

२० .सामान्यविषेशयोः उक्तिः कः अलंङ्कारः ?

२१. वेदस्य पूर्वभागः कः ?

२२. प्रसिद्धाः कति उपनिषदः सन्ति ?

२३. अन्तेवासी इत्यस्य अर्थः कः ?
२४. तैत्तरीयोपनिषद् कस्मिन् अन्तर्भवति ?
२५. चन्द्रकेतोः पिता कः ?
२६. यागाश्वसंरक्षणाय कः नियुक्तः ?
२७. अश्वस्य कति खुराः सन्ति ?
२८. स्थापत्यवेदः कस्य उपवेदः भवति ?
२९. वास्तुविद्यायाः आधारः कः ?
३०. पूर्वपश्चिमरेखायाः नाम किम् ?
३१. हरिकथायाः अपरं नामकिम् ?
३२. कस्य साहित्यं किम् ?
३३. जातक इत्यस्य अर्थः कः ?
३४. वारुणः कः ?
३५. जातकमालायां कति कथाः सन्ति ?
३६. मद्यस्य अपरनामानि कानि ?
३७. कः ब्राह्मणवेषं धृत्वा आगतः ?
३८. राजा कां घोषणां अकरोत् ?
३९ . तपोवनस्वामिना रचितं खण्डकाव्यं किम् ?
४०. पुरूषार्थाः के ?
४१. स्वामिनः पूर्वाश्रमनामधेयं किम् ?
४२. एतच्छ्रुत्वा अस्य पदच्छेदं लिखतु ।
४३. अश्वोऽश्वः ”
४५ प्रातश्च ”
४६. पताकेयम् ”
४७. धिक् शब्दयोगे का विभक्तिः ?
४८. कलरि इत्यस्य निष्पत्तिः कत्मात् जायते ?

४९. उत्तरकेरलानां ग्रामीणकला का ?

५०. अन्यत् राज्यं इत्यस्य एकं पदं लिखतु ?

५१. जिह्मः इत्यस्य अर्थः कः ?

# Module I

**आशयः - विषयमधिकृत्य अवगमनम्। छात्राः लघुवाक्यैः स्वाशयं प्रकटयति ।**

**प्रक्रिया - विषयमधिकृत्य दत्ताः सूचनाः उपयुज्य टिप्पणीलेखनम् ।**

**भाषापरः - आशयान् क्रोडीकृत्य टिप्पणीलेखनम् ।**

**प्रवर्तनम्**

छात्रान् सङ्घीकृत्य कक्ष्यायां चर्चां प्रचालयति अध्यापकः । विषयमधिकृत्य सूचनाः देयाः। ततः छात्रान् सङ्घेस्थित्वा लघुवाक्यैः स्वस्वाशयानां लेखनाय प्रेरयति । तस्मिन् समये अध्यापकः उचितं सहाय्यं ददाति। छात्रैः सङ्घे स्थित्वा लिखितान् अंशान् क्रोडीकृत्य श्यामफलके लिखति। क्रोडीकृतान् आशयान् टिप्पणीरूपेण लेखनाय निर्दिशति लिखितां टिप्पणीं परस्परं विनिमाय संशोधयति।

**मूल्यनिर्णयसूचकाः**

* **विषयावबोधः**
* **आशयव्यक्तता**
* **भाषाप्रयोगः**

सूचनानुसारं मूल्यनिर्णयं कर्तुं लिखितां टिप्पणीं संशोधयितुं अवसरं ददाति । छात्राः संशोधयन्ति। मूल्यनिर्णयम् कुर्वन्ति च। ततः तस्याः टिप्पण्याः परिष्करणाय निर्दिशति ।

**मातृका**

**अधोदत्तसूचनाः पठित्वा चाक्यार्कूत्त् इति कलारूपमधिकृत्य टिप्पणीं लिखतु ।**

**सूचकाः - अवतारकः - चाक्यारः- हास्यरसप्रधानः - मिषाव् नट्वाङ्गं- वेषः - चम्पुप्रबन्धेभ्यः श्लोकानाम् -नाट्यमण्डपम्।**

हैन्दवाराधनालयेषु प्रचलिता प्रसिद्धा केरलीयकला भवति चाक्यार्कूत्त् । अस्याः अवतारकः चाक्यारः भवति । जनानां मध्ये दृश्यमानान् दुराचारान् दूरीकृत्य धार्मिकविचारोत्पादनम् एव अस्याः कलायाः उद्देश्यम्। हास्यरसप्रधाना कला भवति चाक्यार्कूत्त् । दीपालङ्कृतरङ्के मिष़ाव् , नट्वाङ्गम् इत्यादीनि वाद्योपकरणानि उपयुज्यन्ते। हास्यमाविष्कर्तुं वेषं धरति चाक्यारः । चम्पुप्रबन्धेभ्यः श्लोकानां साभिनय व्याख्यानरूपेण रङ्के अवतारणमेव चाक्यार्कूत्त् । विधिमनुसृत्य निर्मिते नाट्यमण्डपे चाक्यार्कूत्त् अवतारयति ।

## Module II

**आशयः - अव्ययानां प्रश्नवाचकशब्दानां च प्रयोगेण संभाषणरचना ।**

**प्रक्रिया - पाठभागं पठित्वा सम्भाणांशान् पूरयितुं निर्दिशति ।**

**भाषापरः - आशयव्यक्ततता, संभाषणशैलीं च पालयित्वा सम्भाषणरचना करणीया । अव्ययानां, प्रश्नवाचकशब्दानां च परिचायनम् ।**

**प्रवर्तनम्**

अध्यापकः सुरायाः असुरता इति पाठभागस्य वाचनाय निर्दिशति। मद्यपानस्य दूष्यांशान् उद्बोधयितुं प्रयत्नः करणीयः । छात्रान् सङ्घीकृत्य बोधिसत्वस्य सर्वमित्रस्य च मिथः सम्भाषणस्य सम्भाव्य लेखनाय निर्दिशति । प्रश्नवाचकशब्दानां प्रयोगेण छात्राः सम्भाषणं रचयन्ति। ततः लिखितं सम्भाषणम् परस्परं संशोधयति । संभाषणमध्ये कीदृशाः प्रश्नवाचकशब्दाः उपयुज्यन्ते इति चर्चां कुर्वन्ति।

छात्राः परस्परं प्रश्नान् पृच्छन्ति उत्तराणि वदन्ति च ।

यथा

श्रावस्तीनगरस्य राजा कः ?

कः ब्राह्मणवेषं धृत्वा आविर्बभूवुः ?

बोधिसत्वस्य हस्ते किम् आसीत् ?

कुम्भे किं आसीत् ?

अस्य पानीयस्य नाम किम् आसीत् ?

....................

..................

.................

उदाः - पाठभागं पठित्वा संभाषणांशान् पूरयतु ।

बोधिसत्वः - जयतु जयतु महाराजः !

सर्वमित्रः - भवान् ——— ? भवतः हस्ते ——— अस्ति ?

बोधिसत्वः - अहं ब्राह्मणः । मम हस्ते एकं विशिष्टं कुम्भमस्ति ।

सर्वमित्रः - ——————— ?

बोधिसत्वः - कुम्भेऽस्मिन् तैलं वा घृतं वा न । इदं पानीयं पिबति चेत् मदोन्मत्तः भवेत् ।

सर्वमित्रः - ———————?

बोधिसत्वः - अस्य पानीयस्य नाम मद्यं इति ।

सर्वमित्रः - तर्हि अद्य प्रभृति मद्यं न पिबेयुः ।

बोधिसत्वः - ———————

मातृकानुसारं अन्यप्रश्नवाचकशब्दानां अव्ययानां च प्रयोगाय छात्राः प्रेरयितव्याः

**सूचना- संपूर्णवाक्यरचनायै प्रेरणा दातव्या** ।

मूल्यनिर्णयसूचकाः - आशयावगमनम् , भाषाशुद्धिः, सयुक्तिकलेखनम्

एदादृश प्रश्नापग्रथनं आदर्शपरीक्षानन्तरं प्रश्नपत्रानुसारं निश्चयेन करणीयम्